योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १५०

पञ्चाशदधिकशततमः सर्गः १५०

मुनिरुवाच ।

एवंप्रकारया युक्त्या तेनायं मुनिना तदा ।

तथाहं बोधितो येन गतो विदितवेद्यताम् ।। १

ततोऽसौ न मया त्यक्तश्चिरप्रार्थनया तया ।

अवसत्तेन तत्रासौ मृतस्यापि तथैव च ।। २

येनैतन्मुनिना प्रोक्तमिन्दूदयशुभं वचः ।

सोऽयं पश्य मुनिश्रेष्ठस्तव पार्श्वे व्यवस्थितः ।। ३

अनेनोक्तमनुक्तेन ममैतन्मोहघातिना ।

दृश्यपूर्वापरज्ञेन यज्ञेनेवात्तमूर्तिना ।। ४

अग्निरुवाच ।

तदाकर्ण्य वचस्तस्य मुनेर्व्याधोऽभवत्तदा ।

प्रत्यक्षः स्वप्नसर्गः किमिति खिन्न इव स्मयात् ।। ५

व्याध उवाच ।

अहो महच्चित्रमिदं मुने मनसि दुःसहम् ।

कथितं मेऽद्य भवता भवतापापहारिणा ।। ५

यत्स्वप्नकथितस्येयं जाग्रत्प्रत्यक्षतोच्यते ।

लभ्यतेऽपि च तन्नाम वेद चित्रमिदं मुने ।। ७

कथमेष महान्स्वप्नपुरुषः स मुनीश्वर ।

जाग्रत्यपि स्थिरीभूतो भूतो बालमतेरिव ।। ८

एवमाश्चर्यमाख्यानमुच्यतां मे यथाक्रमम् ।

कुतः कस्य किमेतद्वा परमो हि स विस्मयः ।। ९

मुनिरुवाच ।

ततः श्रृणु महाभाग वृत्तं चित्रं किमत्र मे ।

कथयामि समासेन सहसा मां कुरु त्वराम् ।। १०

अनेनैतत्तदा तत्र वर्णितं बोधनाय मे ।

बुधोऽहमभवं चाशु महतोऽस्य तया गिरा ।। ११

तत एतद्गिरा पूर्वः स्वस्वभावः स्मृतो मया ।

अवदातोऽवदातेन नभसेव तपात्यये ।। १२

अहो नु सोऽहमभवं मुनिरित्युदिताशयम् ।

अहमासं हृदा स्फीतात्स्नातोऽवस्थितविस्मयात् ।।१३

इमां भोगास्थयावस्थां प्राप्तोऽस्म्यज्ञ इवाध्वगः ।

धावञ्छ्रमार्तिरम्ब्वर्थी व्यर्थया मृगतृष्णया ।। १४

कष्टं दृश्योपलम्भेन भ्रान्तिमात्रात्मना सता ।

बालो वेतालकेनेव प्राज्ञोऽपि च्छलितो ह्यहो ।। १५

अहो नु चित्रमेतेन मिथ्याज्ञानेन वल्गता ।

नीतः सर्वार्थशून्येन पदवीं काममिमामहम् ।। १६

अथवा यः सोऽहमपि भ्रान्तिमात्रं न सन्मयः ।

तथापि चित्रशतता यन्नामासद्भिडम्ब्यते ।। १७

नाहमस्मि न चैवेयमिदं नायमपि भ्रमः ।

चित्रं सर्वमिदं मिथ्या सर्वं च सदिव स्थितम् ।। १८

किमिदानीं मया कार्यमिह बन्धभिदान्तरः ।

विद्यते मेऽङ्कुरश्छेद्यं तत्तावत्संत्यजाम्यहम् ।। १९

आस्तामेतदविद्यैषा व्यर्थरूपा किमेतया ।

भ्रान्त्या भ्रान्तिरसद्रूपा त्यक्तैवैषा मयाधुना ।। २०

उपदेष्टा मुनिरयमेषोऽत्र भ्रान्तिमात्रकम् ।

ब्रह्मैवाहमिवाभाति रूपमेतद्दिवाभ्रवत् ।। २१

तदेवं तावदुदितज्ञानं वक्ष्ये महामुनिम् ।

इति संचिन्त्य स मुनिस्तत्र प्रोक्त इदं मया ।। २२

मुनिनायक गच्छामि तच्छरीरमिदं निजम् ।

द्रष्टुं यच्च प्रवृत्तोऽस्मि शरीरं तदपीक्षितुम् ।। २३

इत्याकर्ण्य स मामाह हसन्मुनिवरस्तदा ।

कुतस्तौ भवतो देहौ तौ सुदूरतरं गतौ ।। २४

गच्छात्मनैव वा पश्य वृत्तान्तं वृत्तकोविद ।

पश्य तावद्यथावृत्तं दृष्टान्तं ज्ञास्यसि स्वयम् ।। २५

इति संचिन्त्य तं देहं विदं भूसत्तयाऽऽस्मिकम् ।

त्यक्त्वा चिदात्मा तत्प्राणात्पवने योजितो मया ।। २६

प्राक्तनं देहमालोक्य यावदायाम्यहं मुने ।

इहैव तावत्स्थातव्यमित्युक्त्वाहं गतोऽनिलम् ।। २७

अथ वातरथारूढो गगनं भ्रान्तवानहम् ।

पुष्पामोद इवानन्तं गत्वा च त्वरया चिरम् ।। २८

ततश्चिरमपि भ्रान्त्वा यदा गलविलं चलन् ।

अहं न प्राप्तवांस्तस्य किंचिदस्याशयस्थितः ।। २९

तदा खेदमुपायातः परमं पुनरागतः ।

इदमेव जगज्जालमहमालानमात्मनः ।। ३०

इहेमं लब्धवानग्रे ततो मुनिमनुत्तमम् ।

पृष्टवानहमेकाग्रस्तत एवमिदं गृहे ।। ३१

किमेतद्भगवन्ब्रूहि पूर्वापरविदांवर ।

त्वं पश्यसि यथावृत्तमुत्तमज्ञानचक्षुषा ।। ३२

यस्य देहं प्रविष्टोऽहं स च मद्वपुरेव च ।

क्व तावुभौ गतौ देहौ न लब्धौ केन हेतुना ।। ३३

मयातिचिरमाभोगि भ्रान्तं संसारमण्डलम् ।

स्थावरादाऽऽत्मनः कस्मात्प्राप्तं गलबिलं न तत् ।। ३४

गत्वेति पृष्टः स मुनिः समुवाच महाशयः ।

जानासि तत्स्वयं कस्मादिति तामरसेक्षण ।। ३५

एतदालोकयसि चेत्स्वयं योगैकसंविदा ।

तत्पश्यस्येव निःशेषं यथा करतलाम्बुजम् ।। ३६

तथापि यदि शुश्रूषा तवास्ति वचसा मम ।

तदिदं श्रृणु वक्ष्यामि यथावृत्तमखण्डितम् ।। ३७

तपस्तामरसोष्णांशुः कल्याणकमलाकरः ।

ज्ञानाब्जस्य हरेर्नाभिर्नास्ति तावदयं भवान् ।। ३८

स त्वं कदाचित्तपसि स्थितः स्वप्नदिदृक्षया ।

कस्यचिद्धृदयं जन्तोः प्रविष्टः पुष्टसंविदा ।। ३९

यत्त्वं प्रविष्टो हृदयं तत्रेदं भुवनत्रयम् ।

दृष्टवानसि विस्तीर्णं रोदसी विपुलोदरम् ।। ४०

इति त्वयि चिरं व्यग्रे देहस्तस्य तथापि च ।

स संसुप्ताकृतिर्यत्र स्थितस्तत्र महावने ।। ४१

लग्नोऽग्निर्धूमधूम्राभ्रसाम्बराम्बरडम्बरः ।

वलद्वलचलालातचक्रसूर्येन्दुमण्डलः ।। ४२

दग्धाभ्रभस्मसंपूर्णधूमाभ्रासितकम्बलैः ।

आनीलाकाशदलपैरिव संछादिताम्बरः ।। ४३

दरीगृहविनिष्क्रान्तसिंहनिर्ह्रादतर्जितैः ।

स्फुटैश्चटचटास्फोटैर्जडीकृतदिगन्तरः ।। ४४

तालीतमालमालानां गतानामग्निवृक्षताम् ।

पातैरुत्पातवह्न्यभ्रकवत्करकरैर्घनः ।। ४५

दूरदेशगतैर्दृष्टस्थिरसौदामनीधिया ।

द्रवत्कनकनिष्यन्दकुट्टिमं व्योम दर्शयन् ।। ६

कणैस्तारागणं कान्तैर्व्योम्नि द्विगुणतां नयन् ।

वक्षःस्थबालवनितानयनानन्दनन्दनः ।। ४७

ज्वालाधमधमाशब्दप्रध्मातगगनोदरः ।

दरीगृहविनिष्क्रान्तभ्रान्तोन्निद्रवनेचरः ।। ४८

अर्धदग्धद्रवत्सिंहमृगव्याधविहंगमः ।

क्वथत्सरःसरित्स्रोतोरन्धितोग्रवनेचरः ।। ४९

वलज्ज्वालाज्वलद्बालचमरीचारुचञ्चुरः ।

दह्यमानवनप्राणिमेदोगन्धावृताम्बुदः ।। ५०

तेन कल्पाग्निकल्पेन वल्गता वनवह्निना ।

सयुष्मदाश्रमो दग्धः सर्पेणेव प्रसर्पता ।। ५१

व्याध उवाच ।

तत्र तस्याग्निदाहस्य हेतुः कः प्राकृतो मुने ।

तद्वनं ते बटुवराः सर्वं नष्टं कथं सह ।। ५२

मुनिरुवाच ।

संकल्पकमनस्पन्दः संकल्पादिक्षयोदये ।

यथा हेतुर्निरास्पन्दोऽचिराद्धि त्रिजगत्तथा ।। ५३

हृदये च वनान्ते च क्षोभाक्षोभेषु कारणम् ।

यथा स्पन्दोऽचिरात्स्पन्दस्तथा त्रिजगतामिह ।। ५४

धातुः संकल्पनगरं जगत्तत्स्पन्दनं त्विह ।

प्रजोदयक्षयक्षोभवर्षावर्षादिकारणम् ।। ५५

ब्रह्मादिमानसोऽप्यस्य सोऽप्यन्यत्र चिदम्बरे ।

इत्यपर्यवसानेयं शान्तैका चिन्नभोगतिः ।। ५६

चितिनभसि चिन्नभःश्रीः

कचतीति निरामया विदुषाम् ।

मूर्खाणां तु यथैषा

यादृग्वा तन्मयीह न सत् ।।

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो०नि०उ०अ०वि० श० परमोपदेशो नाम पञ्चाशदधिकशततमः सर्गः